# Ganeshashtakam 2

# गणेशाष्टकम् २

## Document Information

Text title : gaNeshAShTakam 2

File name : gaNeshAShTakam2.itx

Category : ganesha, aShTaka

Location : doc_ganesha

Author : Maharshi Vyas

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri, padmapurNa

Latest update : February 19, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# गणेशाष्टकम् २

गणपति-परिवारं चारुकेयूरहारं
गिरिधरवरसारं योगिनीचक्रचारम् ।
भव-भय-परिहारदुःख-दारिद्य-दूरं-
गणपतिमभिवन्देवक्रतुण्डावतारम् ॥ १॥

अखिलमलविनाशम्पाणिनाहस्तपाशं-
कनकगिरिनिकाशंसूर्यकोटिप्रकाशम् ।
भजभवगिरिनाशमालतीतीरवासं-
गणपतिमभिवन्देमानसेराजहंसम् ॥ २॥

विविध-मणिमयूखैः शोभमानं विदूरैः-
कनक-रचित-चित्रङ्कण्ठदेशेविचित्रम् ।
दधति विमलहारं सर्वदा यत्नसारं
गणपतिमभिवन्दे वक्रतुण्डावतारम् ॥ ३॥

दुरितगजममन्दं वारुणीं चैव वेदं
विदितमखिलनादं नृत्यमानन्दकन्दम् ।
दधतिशशिसुवक्त्रं चाङ्कुशंयोविशेषं
गणपतिमभिवन्दे सर्वदाऽऽनन्दकन्दम् ॥ ४॥

त्रिनयनयुतभालेशोभमाने विशाले-
मुकुट-मणि-सुढाले मौक्तिकानां च जाले ।
धवलकुसुममाले यस्य शीर्ष्णः सताले
गणपतिमभिवन्दे सर्वदा चक्रपाणिम् ॥ ५॥

वपुषि महति रूपं पीठमादौ सुदीपं
तदुपरि रसकोणं यस्य चोर्ध्वं त्रिकोणम् ।
गजमितदलपद्मं संस्थितं चारुछद्मं
गणपतिमभिवन्दे कल्पवृक्षस्य वृन्दे ॥ ६॥

वरदविशदशस्तं दक्षिणं यस्य हस्तं
सदयमभयदं तं चिन्तये चित्तसंस्थम् ।
शबलकुटिलशुण्डश्चैकतुण्डं द्वितुण्डं
गणपतिमभिवन्दे सर्वदा वक्रतुण्डम् ॥ ७॥

कल्पद्रुमाधःस्थित-कामधेनुं चिन्तामणिं दक्षिणपाणिशुण्डम् ।
बिभ्राणमत्यद्भूतचित्तरूपं यः पूजयेत् तस्य समस्तसिद्धिः ॥ ८॥

व्यासाऽष्टकमिदं पुण्यं गणेशस्तवनं नृणाम् ।
पठतां दुःखनाशाय विद्यां संश्रियमश्नुते ॥ ९॥

इति श्रीपद्मपुराणे उत्तरखण्डे व्यासविरचितं गणेशाष्टकं सम्पूर्णम् ।

Proofread by Ravin Bhalekar, Aruna Narayanan narayanan.aruna at gmail.com

*Ganeshashtakam 2*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*